# 7.1.16 QNM SUPPORTING DOC

## Ganeshotsav (17-09-2015)

The idol of Lord Ganesh was installed on 17th September 2015 at Boys Hostel in University Campus. All the students and teachers worshipped Lord Ganesh for11 days. This program aroused a sense of Spiritual values, peace and adoration among students as described in our Vedic Texts.

### ॥ छात्रावासे समाचरितः गणेशोत्सवः ॥

श्रीसोमनाथसंस्कृतविश्वविद्यालयच्छात्रैः प्रतिवर्षं छात्रावासे श्रीगणेशोत्सवस्यानुष्ठानं शास्त्रोक्तपद्धत्या क्रियते। भाद्रपदमासे शुक्लपक्षे चतुर्थ्यां दिनाङ्कानुसारेण १७-०९-२०१५ गुरुवासरे विश्वविद्यालयस्थानां समेषां गुरुचरणानां सान्निध्ये श्रीगणेशविग्रहस्य स्थापना जाता । तत्र कुलसचिवमहोदयाः सपरिवारं मुख्ययजमानपदे उपविष्टाः । ततश्च च्छात्रैरेव शास्त्रोक्तपद्धत्या पूजाविधिः कारितः । एकादशदिनानां श्रीगणेशस्थापनावसरेऽस्मिन् छात्रैः सम्भूय छात्रावासे सहस्रावर्तनाद्यं यं काममधीते तं तमनेन साधयेत् इति गणपत्यथर्वशीर्षस्थं फलश्रुतिवाक्यमेकं सफलीकृतम्।

छात्रैः अष्टोत्तरसहस्रगणपत्यथर्वशीर्षस्य पाठात्मकमनुष्ठानं सश्रद्धं विहितम् । अन्ते गणपतिविसर्जनोत्सवस्यानुष्ठानस्यास्य च पूर्णाहुतिः सञ्जाता । संस्कृतिरक्षायै विश्वविद्यालयेनोत्सवोऽयं समनुष्ठितः। छात्रालयाध्यक्षाणां डॉ.पङ्कजकुमाररावलमहोदयानाम् इतरेषां च अध्यापकानां मार्गदर्शनेन विघ्नविनायकस्योत्सवः निर्विघ्नेन सम्पन्नतां गतः।

Report Source: **SOMJYOTI**- University Newsletter (Issue:12, Page no. 05)

# Cultural Program(08-02-2016)

The Cultural Program was organized on 8th February 2016 by Shree Somnath Sanskrit University. In this occasion, students performed plays and dances.  The Hon'ble Vice-Chancellor of the university concluded the program. This program evoked a sense of creativity, sharing, love, social collaboration, self-confidence, etc. among the students and also revealed their hidden talent.

नरेन्द्रकुमारपण्डयामहोदयाः कृतवन्तः । अध्यक्षत्वं च ऊढवन्तः श्रीभाग्येशझामहोदयाः । समग्रस्यास्य कार्यक्रमस्य संयोजनं संकलनं च कृतवन्तः प्रो. हर्षदेवमाधवमहोदयाः ।

## सांस्कृतिककार्यक्रमः

अन्ताराष्ट्रियसंस्कृतसङ्गोष्ठयाः अङ्गतयैव विशेषाकर्षणरूपेण सांस्कृतिककार्यक्रमः विश्वविद्यालयेन ८-२-२०१६ तमे दिनाङ्के समायोजितः आसीत् । कार्यक्रमेऽस्मिन् भावाश्रितानि रसाश्रितानि नृत्यानि विशेषप्रयोगपूर्वकाणि नाटकानि च अभवन् । पुनश्च गुर्जरसंस्कृतमिश्रभावाश्रितं यत्सञ्चालनं अध्यापकाः अकुर्वन् तत्तु सर्वाधिकाद्भुतमेव । मान्याः कुलपतिवर्याः अस्य कार्यक्रमस्य सफलतायै ये अध्यापकाः ये च छात्राः प्रयत्नं कृतवन्तः तान् पुरस्कारादिभिः आशीर्वचोभिश्च सम्मानितवन्तः । कार्यक्रमस्यास्य संयोजनं कृतवन्तः डॉ. दीपेशकतिरा, डॉ. ललितपटेलः, डॉ. अमृतलालभोगायता च ।





सांस्कृतिककार्यक्रमाः



सांस्कृतिककार्यक्रमेषु भागम् ऊढवतां चित्रम्

Report Source: **SOMJYOTI**- University Newsletter (Issue: 13, Page no. 04)

## Annual Program(02-04-2016)

Shree Somnath Sanskrit University organized the Annual Program on 2nd April 2016. The Hon'ble Vice-Chancellor, Prof. Ark Nath Choudhary, Respected Registrar Sir Dr. Dashrath Jadav and the academic and non-academic staff and all the students of the University were present with their families. Students participated in many Cultural Activities. Through this program students came to know the hidden talent on themselves and alsolearnt the sense of leadership, anchoring, admiration,brotherhood, social harmony etc.





### सोल्लासं समाचरितः वार्षिकोत्सवः

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य प्रथमः वार्षिकोत्सवः ०२/०४/२०१६ तमे दिनाङ्के समाचरितः । सायं सप्तवादनतः आरब्धेऽस्मिन् वार्षिकोत्सवे बहवः सांस्कृतिककार्यक्रमाः छात्रैः प्रस्तुताः । माननीयकुलपतिः श्रीअर्कनाथचौधरी, कुलसचिवः श्रीदशरथजादवः, परीक्षाधिकारी श्रीयोगेशपटेलः, अनुस्नातकविभागाध्यक्षः प्रो. देवेन्द्रनाथपाण्डेयः, प्राचार्यः डॉ. नरेन्द्रपण्ड्यामहोदयः इत्यादिमहानुभावाः विशेषरूपेण उपस्थिताः आसन् । सर्वेऽपि अध्यापकाः, शिक्षणेतरकर्मचारिणः अधिकारिणश्च अत्र सपरिवारं उपस्थिताः आसन् । छात्रैः संवादात्मकाभिनवपद्धत्या सञ्चालितस्य कार्यक्रमस्यास्य आरम्भः वैदिक्या प्रार्थनया अभवत् । तदनु दर्शनसङ्कास्य डॉ. जानकीशरणेन, उमामहेश्वर्या च विश्वविद्यालयविषये स्वानुभवः आविष्कृतः । आचार्यद्वितीयवर्षीयच्छात्रस्य सञ्जयस्य गीतेन सर्वे आनन्दिताः अभवन् । रुबिनासाहू, आकाशपुरोहितः, मयूरजानी, जोषीभाविकः, अरुणपाण्डेयः, प्रकाशमिश्रः, परमेशमिश्रः, आकाशपुरोहितः, जोषी मेहुलः, भावेशबामणिया इत्यादिच्छात्रैः सङ्गीतनाटकादीनां प्रस्तुतिः कृता । माननीयकुलपतिना प्रो. अर्कनाथचौधरीमहोदयेन स्वीये उद्बोधने उक्तं यत् कस्यापि विश्वविद्यालयस्य वार्षिकोत्सवः तत्रत्यानां छात्राणां प्रातिभसमारोहः भवति । यस्मिन् छात्राः शिक्षणेतरगतिविधीन् प्रदर्शयन्ति । सर्वेषु च्छात्रेषु काचिद् विशिष्टा प्रतिभा भवति, या एतादृशैः कार्यक्रमैः प्रकटिता भवति । एतादृशेन कार्यक्रमेण छात्राः विविधान् अनुभवान् समवाप्य राष्ट्रस्तरे स्वप्रातिभप्रदर्शने सामर्थ्यमवाप्नुवन्ति । माननीयकुलसचिवेनापि अमुं कार्यक्रमं दृष्ट्वा "अभिनवोऽयं कार्यक्रमः" इति स्वमनोभावः प्रकटितः ।

वार्षिकोत्सवे समुपस्थिताः वामतः प्रो. देवेन्द्रनाथपाण्डेयः, डॉ. नरेन्द्रकुमारपण्ड्या, प्रो. अर्कनाथचौधरी, डॉ. दशरथजादवः, श्रीयोगेशपटेलः

कुलसचिवेन एदर्थमपि छात्राणां प्रशंसा कृता यत् विश्वविद्यालयस्य अयं प्रथमः कार्यक्रमः यः छात्रैः प्रस्तावितः, संरचितः, सञ्चालितश्च । तदनु प्रो. देवेन्द्रनाथपाण्डेयः, डॉ. नरेन्द्रपण्ड्या च छात्रान् अबोधयताम् । कार्यक्रमान्ते वाग्वर्धिनीपरिषदि सर्वाधिकतया भाषणकर्तृभ्यः अरुणपाण्डेयः, परमेशमिश्रः, राहुलकुमारझा, प्रकाशरञ्जनमिश्रः, शियाणी जयेशः इति पञ्चभ्यः छात्रेभ्यः "वाग्भूषणपुरस्कारः" महानुभावैः प्रदत्तः । अपि च अस्मिन् शैक्षिकवर्षे यैः छात्रैः विभिन्नस्थलेषु प्रतियोगितासु पुरस्काराः प्राप्ताः, तेषामपि महानुभावैः सम्माननं कृतम् । समग्रस्यापि कार्यक्रमस्य सञ्चालनं राहुलझा, गामितकरिश्मा च अकुरुताम् । कार्यक्रमान्ते चन्द्रमौलिबालकच्छात्रावासे सर्वैः सग्धिः कृता।

Report Source: **SOMJYOTI**- University Newsletter (Issue: 13, Page no. 05)

# Annual Program(01-04-2017)

The Annual Programwas organized on 1st April2017, in the university campus. The Deputy Collector of Gir-Somnath District, Shri Jwalant Rawal was the Chief Guest of this program. Students participated in many Cultural Programs like singing, dancing, dramas etc.Through this program students came to know the hidden talent on themselves and also learnt the sense of leadership, anchoring,admiration, brotherhood, social harmony etc.





## वार्षिकोत्सवः

वार्षिकोत्सवस्य कतिपय-दृश्यानि

**प्राप्तपुरस्काराणां नामानि**

१. अरुणकुमारः पाण्डेयः
२. जिगरभट्टः
३. जयेशः शियाणी
४. सुनीता चौधरी
५. अल्पा वाला
६. वैशाली वाघ
७. धरमः कचोट
८. पायल वासरा
९. ज्योत्सना लाखणोत्रा
१०. रिंकल गामित

**वाग्वर्धिनीसभायाः चिताः छात्राः**

१. अरुणकुमारः पाण्डेयः
२. परमेशकुमारः मिश्रः
३. मयूरः जानी
४. राहुलकुमारः झा
५. नन्दनः पण्ड्या

१-४-२०१७ तमे दिनाङ्के श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य शैक्षणिकभवने परम्परानुगुणं वार्षिकोत्सवः समाचरितः । तेन सममेव प्राच्यच्छात्र सम्मेलनकार्यक्रमोऽपि समनुष्ठितः । कार्यक्रमेऽस्मिन् श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतयः मान्याः प्रो. अर्कनाथचौधरीमहोदयाः, डॉ. दशरथजादवमहोदयाः, गीरसोमनाथजनपदस्य उपसमाहर्तारः श्रीमन्तः ज्वलन्तरावल-महोदयाः, अनुस्नातक विभागाध्यक्षाः प्रो. विनोदकुमारझामहोदया, विश्वविद्यालयसञ्चालित-संस्कृतमहाविद्यालयस्य आचार्याः डॉ. नरेन्द्रकुमारपण्ड्या-महाभागाः च समुपस्थाय कार्यक्रमस्य शोभाम् ऐधापयन्त।

कार्यक्रमस्य समारम्भः उपस्थितैः महानुभावैः दीपप्रज्वालनेन कृतः। ततश्य विश्वविद्यालयस्य सांस्कृतिकसमितेः सभ्याः अन्तेवासिनश्च नृत्यनाट्यगीतवाद्यादिपुरस्सरं विविधान् रमणीयान् हृदयावर्जकान् सांस्कृतिककार्यक्रमान् विहितवन्तः । कैश्चत् प्रमुखैः छात्रैः छात्राभिश्च स्वकीयोऽनुभवो निरुक्तः। अन्ते च समग्रे वर्षे यैः छात्रैः काचिद् विशिष्टा सिद्धिः राज्यस्तरीये राष्ट्रस्तरीये च अवाप्ताः तेषां तेषां छात्राणां सम्माननं जातम् । अथ च वाग्वर्धिनीपरिषदः चितानां विद्यार्थिनां वाग्भूषणपुरस्कारपुरस्सरं सभाजितवन्तः मञ्चस्थाः महानुभावाः । कार्यक्रमान्ते सर्वेऽपि समिष्टान्नभोजनं कृतवन्तः।

Report Source: **SOMJYOTI**- University Newsletter (Issue: 15, Page no. 06)

# Inauguration Of The Pramukh Swami Gate

# (06-10-2017)

On 6th October, Shree Somnath Sanskrit University inaugurated the main gate of the University Campus "Pramukh Swami Dwar". The gate was built by BAPS Swaminarayan Sanstha. Through this program, a sense of charity was aroused among the students and they also learnt the importance ofGuru-shishya Tradition as stated in our Vedic Texts.



## ॥ श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य श्रीप्रमुखस्वामिमहाराजद्वारस्य लोकार्पणविधिः ॥

द्वादश-स्वयंभूज्योतिर्लिङ्गष्वाद्यतमे सोमनाथमहादेवस्य प्रभासक्षेत्रे संस्थिते श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य प्राङ्गणे अत्यद्भुतं द्वारं बीएपीएसस्वामिनारायण-संस्थासौजन्येन विनिर्मापितम्। तस्य नाम श्रीप्रमुखस्वामिमहाराजद्वारम्। ५१ फीट परिमितमुच्चैःस्थं ६९ फीट परिमितं लम्बायमानं १६ फीट स्थवीयं द्वारमिदम्। एतदेव तस्य भव्यतायाः प्रस्फुटनम्। यस्मिन् क्षीरार्णवशिल्पशास्त्रानुसारं नैकविधानां सरस्वतीनां सर्वेषां दर्शनानां कलानाञ्च प्रतिनिधिरूपाः कालिदास-वेदव्यास-पाणिनि-पतञ्जल्याद्यानां मूर्तयः जीवत्कल्पाः शोभन्ते। तस्य लोकार्पणं ६-१०-२०१७ तमे पुण्याहे सम्पन्नम्। तत्काले कुलपतिश्रीअर्कनाथचौधरीमहोदयेन व्याहृतं यदेतादृशं महाद्वारं मया विलोकितेषु २०० संङ्ख्याकविश्वविद्यालयेषु कुत्रापि नैव दृष्टिगोचरम्।

एतस्य द्वारस्य उद्घाटनावसरे बीएपीएस संस्थायाः वरिष्ठसद्गुरुश्रीडॉक्टरस्वामिनः (स्वामिस्वयंप्रकाशदासाः), संस्थाया अन्ताराष्ट्रियसंयोजका ईश्वरचरणदासस्वामिनः, प्रमुखस्वामिमहाराजेन सह चत्वारिंशदधिकवर्षपर्यन्तं भ्रमणकर्तारः स्वामिविवेकसागरदासस्वामिनः राज्यस्तरीय-नागरिकोड्डुयनमन्त्रिवर्या जशाभाईबारडमहोदयाः वेरावलपाटणसंयुक्तनगरपालिकाप्रमुखाः श्रीजगदीशभाईफोफंडीमहोदयाः अन्ये च समाहर्त्रादयाः महानुभावा उपस्थिता आसन्।

प्रमुखस्वामिमहाराजस्य वर्तमानानुगामिमहन्तस्वामिमहाराजेन लन्दननगरात् वीडीओमाध्यमेन स्वाशीर्वचांसि व्याहरता सम्भाषितं यत् -अस्माद् द्वाराद् यः कोपि गमनागमनं विधास्यति तस्यान्तःकरणशुद्धिः सम्पत्स्यते।' कार्यक्रमारम्भे आर्षशोधसंस्थाननिदेशकेन संस्कृतस्य महत्त्वं तथा स्वामिनारायणसंस्थायाः एतद्विश्वविद्यालयेन सहारम्भकालात् सम्बन्धो निरूपितः। कुलपतिमहोदयेन भारतीयसंस्कृतिः संस्कृतसम्भृता इत्येतत् प्रत्यपादि। विवेकसागरस्वामिभिः संस्कृत-संस्कृति-सन्त इत्येतेषां त्रयाणां महत्तां व्याहृत्य प्रमुखस्वामिमहाराजेन विहिता तेषामभिवृद्धिः सम्यक् परिवेषिता। ईश्वरचरणस्वामिभिः पूर्वगुरूणां संस्कृतानुरागं प्रतिपाद्य वर्तमानकाले प्रमुखस्वामिमहाराजेन लेखापितानि भद्रेशदासस्वामिविरचितप्रस्थानत्रयीभाष्याणि सगौरवं समुल्लेखितानि। मध्ये छत्रपतिशिवाजीमहाराजस्य सफलताया रहस्यरूपाया गुरुनिष्ठायाः तथा स्वधर्मनिष्ठायाः प्रतिपादकं नाटकं तथा संस्कृत-संस्कृतिसन्तमहिमवृद्धिप्रदं नृत्यं बालयुवभिः निदर्शितम्। २००० संख्याकाः जना गौरवमये कार्यक्रमेऽस्मिन् सम्मिलिताः। तथा च विश्वविद्यालयसञ्चालितमहाविद्यालयस्य प्राचार्यैः नरेन्द्रकुमापण्ड्या बी.ए.पी.एस. संस्थायः स्वामिना द्वारस्य मोक्षद्वारेण









Report Source: **SOMJYOTI**- University Newsletter (Issue: 16, Page no. 06)

## Guru Purnima (27-7-2018)

On 27th July the students of University celebrated Guru Purnima Festival with all the teachers according to Indian Tradition. This program evoked the sense of service, adoration and dedication towards Guru and our Spiritual Texts like Puranas, Shrimad Bhagavad Gita etc.

### समाचरितं गुरुपूर्णिमापर्व


भारतीयपरम्परानुसारं श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य छात्रा: २७.०७.२०१८ तमे दिनाङ्के गुरुपूर्णिमहोत्सवं समनुष्ठितवन्त:। अस्मिन् दिने विश्वविद्यालये छात्रै: वैदिकमङ्गलेन समारभ्य गुरुभि: सह भगवत: वेदव्यासस्य पूजनं समर्चनम् अक्रियत। तत: सभागृहे तत्कालीनकार्यकारिकुलपतिना सह सर्वै: गुरुभि: समुपस्थाय छात्राणां भावपुष्पार्चनम् अङ्गीकृतम्। तदनु छात्रा: गुरुवन्दनं विधाय केचन गुरुपूर्णिमासम्बद्धान् स्वस्वविचारान् प्रत्यपादयन्। कार्यक्रमेऽस्मिन् सर्वेऽपि अध्यापका: समुपस्थाय सर्वान् छात्रान् स्वाशीर्भि: अन्वगृह्णन्।

प्रसङ्गेऽस्मिन् अनुस्नातकविभागाध्यक्षा प्रो. अर्चना दुबे, प्राचार्य: डॉ. नरेन्द्रकुमार एल्. पण्ड्या, प्रो. देवेन्द्रनाथपाण्डेय: अन्ये च गुरव: छात्रेभ्य: आशीर्वचांसि व्यतन्वन्। गुरुपूर्णिमाख्य: कार्यक्रमोऽयं सम्पूर्णतया विश्वविद्यालयच्छात्रै: समायोजि। पूर्णतामन्त्रेण शान्तिमन्त्रेण च कार्यक्रमोऽयं समाप्तिम् अगात्।

Report Source: **SOMJYOTI**- University Newsletter (Issue: 17-18, Page no. 04)

## Ganeshotsav (13-09-18 TO 17-09-18)

Ganesh Puja was celebrated in Boys Hostel for 5 days. The festival began on the fourth day of lunar month of Bhadrapada. Students worshipped Ganesh by chanting Vedic hymns and Hindu texts in guidance of teachers.This program aroused a sense of Spiritual values, peace and adoration among students as described in our Vedic Texts.



### चन्द्रमौलिच्छात्रावासे समनुष्ठितः गणेशोत्सवः

'कलौ चण्डीविनायकौ' इत्युक्तिः सम्प्रति सार्थकतां गता दृश्यते। प्रतिवर्षमिव अस्मिन्नवर्षे भाद्रपदमासे शुक्लपक्षे चतुर्थीतः आरभ्य नवमीं यावत् तदनुसारं १३.०९.२०१८ तः १७.०९.२०१८ पर्यन्तं श्रीसोमनाथ-संस्कृतविश्वविद्यालस्य चन्द्रमौलिच्छात्रावासे सानन्दं छात्रैः गणेशोत्सवः समाचरितः। अस्मिन् पञ्चदिनात्मके गणेशोत्सवे प्रातः सायं च गणेशस्य पूजनं गुरुभिः छात्रैश्च सम्भूय अक्रियत। गणेशोत्सवस्य अयं सम्पूर्णः कार्यक्रमः अध्यापकानां मार्गदर्शने छात्रैः सम्पादितः। पञ्चमे दिने छात्रैः भगवतः गणेशस्य प्रतिमायाः विसर्जनं समुद्रप्रवाहे कृतम्। अत्र गणेशप्रतिमायाः इदं वैशिष्ट्यम् आसीत् यत् अस्याः समुद्रे विसर्जनेन न कापि पर्यावरणहानिः अभूत्।

Report Source: **SOMJYOTI**- University Newsletter (Issue: 17-18, Page no. 06)

# Saraswati Pooja (10-02-2019)

Saraswati Pooja was performed by the students in the academic building of University on 10th February. Hon'ble Vice-Chancellor of the University, Prof. Gopabandhu Mishra worshipped Devi Saraswati with the family. Yajna Rituals also performed by the students and teachers. This program aroused the sense of faith and dedication towards spiritual Knowledge, respect for women and purity of heart among students.



## शैक्षणिकभवने समाचरितः सरस्वतीदेव्याः पूजनोत्सवः

१०.०२.२०१९ तमे दिनाङ्के श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य शैक्षणिकभवनपरिसरे छात्रैः सरस्वतीदेव्याः पूजनोत्सवः समाचरितः। प्रतिष्ठितसरस्वतीदेव्याः पूजनं हवनञ्च वैदिकरीत्या छात्रैः अध्यापकैश्च अक्रियत। तत्र कुलपतिमहोदयाः प्रो. गोपबन्धुमिश्रमहाभागाः सपरिवारं मुख्ययजमानरूपेण उपस्थिताः आसन्। पूजनावसरे छात्रैः सम्भूय श्रीसूक्तस्यापि पाठः विहितः। 'भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा' इति वचनं सार्थकं कर्तुं विश्वविद्यालयेन कार्यक्रमोऽयं सम्पादितः। किञ्च विश्वविद्यालयेन मान्यकुलपतेः मार्गदर्शनेन प्रेरणया च प्रतिमासं विश्वविद्यालयपरिसरे विद्यमानायां यज्ञशालायां यज्ञानुष्ठानं विधीयते, यत्र छात्राः प्राध्यापकाः इतरे च श्रद्धालवः भागं गृह्णन्ति।

सरस्वतीपूजनदिवसे यज्ञानुष्ठानरतः मान्यः कुलपतिवर्यः

Report Source: **SOMJYOTI**- University Newsletter (Issue: 19, Page no. 11)

# Guru Purnima (16-07-19)

Guru Purnima festival was celebrated on 16th July 2019 in the University Campus by worshipping Maharshi Veda Vyas, chanting Vedic hymns and performing Yajnas. Students also participated in many cultural activities.This program evoked the sense of service, adoration and dedication towards Guru and our Spiritual Texts like Puranas, Shrimad Bhagavad Gita etc.



अप्रैल-सितम्बर २०१९ 05 सोमज्योतिः (संयुक्ताङ्कः - २०-२१)

## गुरुपूर्णिमामहोत्सवः समाचरितः विश्वविद्यालये

१६- ०७- २०१९ दिनाङ्के श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य परिसरे व्यासपूर्णिमा इत्यभिधेयां गुरुपूर्णिमाम् अभिलक्ष्य गुरूणां पूजनं समयोजितम्। अष्टादशपुराणानां कर्तुः सत्यवतीसुतस्य पूजनस्य आयोजनं डॉ. पङ्कजकुमाररावलवर्येण किञ्च इतरैः अध्यापकैः छात्रैश्च विधिपूर्वकम् अक्रियत। अस्मिन्नवसरे भगवतः बादरायणस्य पूजनार्थं विश्वविद्यालयस्य माननीयः कुलपतिः प्रो. गोपबन्धुमिश्रः, अनुस्नातकविभागाध्यक्षा प्रो. अर्चना दुबे, प्राचार्यः डॉ. नरेन्द्रकुमार पण्ड्या अन्ये च अध्यापकाः कर्मचारिणः, छात्राश्च उपास्थिताः आसन्।

अस्मिन् पूजनकार्यक्रमे आचार्यत्वेन सोमनाथस्थः कर्मकाण्डविद्वान् वेदज्ञश्च श्रीपरागभाईपाठकः विशेषरूपेण समुपातिष्ठत्। तेन विश्वविद्यालयच्छात्रसाहाय्येन विविधोपचारैः विविधमन्त्रैश्च सत्यवतीसुतस्य पूजनं सम्पादितम्। तदनु कुलक्रमानुगुणं छात्रैः सम्भूय प्रभासज्योतिः इति शैक्षणिक-भवनस्य सभाखण्डे गुरुपूजाङ्गतया यथोपचारं यथाशक्ति समेषां गुरूणां पूजनं समक्रियत। अस्मिन्नवसरे केचन छात्राः स्वान्तकरणैः गुरून् प्रति आदरभावो प्रकटीकृत्य गुरुगाथा वर्णिता। तत्पश्चात् गुरुभिरपि स्ववचोभिः छात्रकल्याणाय मार्गदर्शनं प्रदत्तम्।

व्यासपूजनरतः माननीयः कुलपतिः प्रो. गोपबन्धुमिश्रः

गुरुपूजनकार्यक्रमे सांस्कृतिककार्यक्रमप्रस्तुतिः उपस्थिताश्च छात्राध्यापकाः

Report Source: **SOMJYOTI**- University Newsletter (Issue: 20-21, Page no. 05)

# Lecture on Sanskrit VangmayeGotattvaVimarsh (27-09-2019)

On 27th September 2019, Dr. Vallabhbhai Kathiria, Chairman of National Kamdhenu Commission delivered lecture on"संस्कृतवाङ्मये गोतत्त्वविमर्शः".Through this program students learnt the importance of 'गोतत्त्व', which is the soul of Indian Culture and Yajna Culture.

अप्रैल-सितम्बर २०१९ 09 सोमज्योतिः (संयुक्ताङ्कः - २०-२१)




संस्कृतवाङ्मये गोतत्त्वं विमर्शयन् डॉ. कथिरियावर्यः



व्याख्यानसत्रे उपस्थिताः प्राध्यापकाः छात्राश्च

## "संस्कृतवाङ्मये गोतत्त्वविमर्शः" विषये व्याख्यानम्

२७-९-२०१९ दिनाङ्के भारतसर्वकारस्य राष्ट्रिय-कामधेनु-आयोगस्य अध्यक्षः डॉ. वल्लभभाईकथिरियावर्यः "संस्कृतवाङ्मये गोतत्त्वविमर्शः" इति विषयमादाय विश्वविद्यालय-परिसरे व्याख्यानमेकं प्रादात्। अस्मिन्नवसरे कुलसचिवः डॉ. दशरथजादवः, अनुस्नातकविभागाध्यक्षा प्रो. अर्चनादुबे, प्राचार्यः डॉ. नरेन्द्रकुमार पण्ड्या, अन्ये च शिक्षकाः, कर्मचारिणः छात्राश्च समुपातिष्ठन्। डॉ. कथिरियावर्येण भारतसर्वकारेण किञ्च राष्ट्रिय-कामधेनु-आयोगेन क्रियमाणानां कार्याणां सम्यग्विवरणं प्रदाय गोमहिमविषये सुष्ठु भणितम्। "अयं विश्वविद्यालयः न केवलं संस्कृताध्यापने एव तत्परो विद्यते परं संस्कृतिरक्षणेऽपि कृतसङ्कल्पो दृश्यते" इति डॉ. कथिरियामहोदयः अब्रवीत्। स्वव्याख्यानेन सह डॉ. कथिरियामहोदयः भारतसर्वकारेण गोसेवाविषये गोसंवर्धनविषये च क्रियमाणान् बहुविधप्रकल्पान् व्यज्ञापयत्। अस्मिन्नवसरे डॉ. नरेन्द्रकुमार पण्ड्या, डॉ. पङ्कजकुमार रावलः, डॉ. शत्रुघ्न पाणिग्राही च संस्कृतवाङ्मये गोतत्त्वविषये उद्बोधनम् अकार्षुः। आभारविधिज्ञापनकाले कुलसचिवः डॉ. दशरथजादवः राष्ट्रिय-कामधेनु-आयोगस्य संशोधनकेन्द्रमेकं श्रीसोमनाथसंस्कृत-विश्वविद्यालयपरिसरेऽपि भवेत् इति डॉ. कथिरियावर्याय न्यवेदयत्।

Report Source: **SOMJYOTI**- University Newsletter (Issue: 20-21, Page no. 09)

# Ganeshotsav(02-09-2019to06-09-2019)

Ganesh Chaturthi festival was celebrated for 5 days in Boys hostel by worshipping Lord Ganesh. On the last day of the festival all the students, academic and non-academic staff immersed the statue of Lord Ganesh in the seaby taking out of procession. This program aroused a sense of Spiritual values, peace and adoration among students as described in our Vedic Texts.

## चन्द्रमौलिच्छात्रावासे समायोजितः गणेशोत्सवः



विघ्नहर्तुः श्रीगणेशस्य पूजायां कुलपतिवर्यः छात्राश्च

" उत्सवप्रियाः खलु मानवाः " इति कविकुलगुरुकालिदासस्य वचनानुगुणं श्रीसोमनाथसंस्कृतविश्वविद्यालयपरिसरे चन्द्रमौलिच्छात्रावासे सितम्बरमासस्य २ तः ६ दिनाङ्कपर्यन्तं छात्रैः छात्राभिश्च पञ्चदिनात्मकः गणेशोत्सवः समायोजितः आसीत्। तेषु दिवसेषु विश्वविद्यालयस्य सर्वाङ्गीणविकासाय भगवतः विघ्नहर्तुः विनायकस्य विविधोपचारैः पृथक्-पृथग्वेदमन्त्रैश्च छात्रावासस्य गृहपतिना भाविनपण्ड्यामहोदयेन तथा च वेदज्ञैः छात्रैः पूजनं कारितं कृतञ्च। प्रथमेऽहनि भगवतः प्रतिष्ठार्थं पूजनार्थं च विश्वविद्यालयस्य मान्यः कुलपतिः प्रो. गोपबन्धुमिश्रः समुपातिष्ठत्। मध्यदिवसे गौरीनन्दनस्य अन्नकूटस्याप्यायोजनं कृतमासीत्। पूजनोत्तरे काले प्रतिदिवसं विश्वविद्यालयस्य समेषां छात्राणाम्, अध्यापकानां, कर्मचारिणां च कल्याणाय छात्रैः गणपत्यथर्वशीर्षस्तोत्रानुष्ठानं विहितम्। अन्ते कुलक्रमानुगुणं नादपुरस्सरं जयघोषपुरस्सरम् आनन्दप्रमोदेन सह छात्राः चन्द्रमौलिच्छात्रावासतः समुद्रं यावत् शोभायात्रारूपेण उत्सवं विधाय भगवतः गणेशस्य विसर्जनं कृतवन्तः।

Report Source: **SOMJYOTI**- University Newsletter (Issue: 20-21, Page no. 09)